# Bharata Gauravam 2

# भारतगौरवम् २

## Document Information

Text title : Bharata Gauravam 2

File name : bhAratagauravam2.itx

Category : misc, sanskritgeet

Location : doc_z_misc_general

Author : mahAdevashAstri

Proofread by : Mandar Mali

Translated by : Mandar Mali

Description/comments : Bharata Rashtra Geetam, Sarvabhaum Sanskrit Prachar Karyalay Pustakamala 38, Vasudev Dvivedi Shastri (Ed.)

Latest update : May 1, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

Bharata Gauravam 2

# भारतगौरवम् २

(स्रग्धरा)

आलोलोल्लोलमाला-कलकलकलिताम्भोधिकूलाल्ललामाद्
यावन्नीहारभूमीधर - धवलशिला - लग्न - भू संविभागान् ।
सीमान्तादा च वङ्गोपसरिदधिपतिं यावदस्त्येष सस्यैः
पत्रश्यामैर्द्रुमाग्रैर्वलयितवसुधो भारतं नाम देशः ॥

वङ्गैः सङ्गीतकीर्तिः कलितकलकलश्चोत्कलैरान्ध्रबन्धु-
र्मद्रैरुन्निद्रमुद्रो जवजनितजयोद्धुर्जरः सिन्धुबिन्दुः ।
पञ्चापैरञ्चितश्रीर्मधुमधुरधुरो - मध्ययुक्तैर्विहारै -
रार्यावर्ताभिधानो जयति जनपदो मानिनां जन्मभूमिः ॥

देवैराप्यायितश्रीरपि सुरझरिणी - निर्झराम्भः - पुनीतो,
नीतः शिक्षां बृहत्याः पतिभिरनुदिनं कीर्तितो लेखवृक्षैः ।
मन्दारैः पारिजातादिभिरथ सहरिः पुण्यभोग्यः सुधाच्छो,
गन्धर्वैर्गीयमानो विलसति सकलो भारतस्वर्गलोकः ॥

गुञ्जद्-भृङ्गालि-गीतैः श्रुतिसुखमधुरैः कूजदालोहिताक्षै-
श्चूतास्वादातिरिक्तस्वरमुखर-पिकैर्माद्यदामोदवाहैः ।
पुष्पाणां पावमानः प्रकृति-वरवधू-नूतनाक्रीडमुग्धं
दिग्धं शोभाभिरामं कुशलकृतिकलोल्लासितं भारतं नः ॥

चारित्र्याणां निधानं मनुजतनुभृतां संविधानं शुचीनां
मर्यादानां निधानं विमलमतिमतां योगिनां सन्निधानम् ।
आधानं दिव्यभासां प्रकृतिविलसितागारमेकं प्रधानं
राष्ट्र न्यायावधानं प्रतिपदमयते भारतोच्चाभिधानम् ॥

विश्वेशः सर्वशक्तिर्गिरिवरतनया-साहचर्यार्चितश्रीः
सान्द्रानन्दामृताम्भोनिधिरमरसरिद्वीचिवाचाल मौलिः ।
स्वातन्त्र्योल्लासलोलां विलसितविभवां सर्वशोभाभिरामां

भव्यां भव्यैकभावां भरत भुवमिमां सर्वदा सम्बिभर्तु ॥

-कवितार्किकचक्रवर्तिश्रीमहादेवशास्त्रिणाम्,
वाराणसेयानाम् ।

Proofread by Mandar Mali

*Bharata Gauravam 2*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*